# bhagavaddhyAnasopAnam

# ભગવદ્ધ્યાનસોપાનમ્

## Document Information

Text title : bhagavaddhyAnasopAnam

File name : bhagavaddhyAnasopAnam.itx

Category : vishhnu, vishnu, dhyAnam, vedAnta-deshika

Location : doc_vishhnu

Author : vedAntadeshika

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Brihatstotraratnakara 1, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 211

Latest update : May 28, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 28, 2021

*sanskritdocuments.org*

# ભગવદ્ધ્યાનસોપાનમ્

શ્રીગણેશાય નમઃ ॥

શ્રીમતે નિગમાન્તમહાદેશિકાય નમઃ ।
શ્રીમાન્વેઙ્કટનાથાર્યઃ કવિતાર્કિકકેસરી ।
વેદાન્તાચાર્યવર્યો મે સન્નિધત્તાં સદા હૃદિ ॥

અન્તર્જ્યોતિઃ કિમપિ યમિનામઞ્જનં યોગદૃષ્ટે-
    શ્ચિન્તારત્નં સુલભમિહ નઃ સિદ્ધિમોક્ષાનુરૂપમ્ ।
દીનાનાથવ્યસનશમનં દૈવતં દૈવતાનાં
    દિવ્યં ચક્ષુઃ શ્રુતિપરિષદાં દૃશ્યતે રઙ્ગમધ્યે ॥ ૧॥

વેદાતીતશ્રુતિપરિમલં વેધસાં મૌલિસેવ્યં
    પ્રાદુર્ભૂતં કનકસરિતઃ સૈકતે હંસજુષ્ટે ।
લક્ષ્મીભૂમ્યોઃ કરસરસિજૈર્લાલિતં રઙ્ગભર્તુઃ
    પાદામ્ભોજં પ્રતિફલતિ મે ભાવનાદીર્ઘિકાયામ્ ॥ ૨॥

ચિત્રાકારાં કટકરુચિભિશ્ચારુવૃત્તાનુપૂર્વાં
    કાલે દૂત્યદ્રુતતરગતિં કાન્તિલીલાકલાચીમ્ ।
જાનુચ્છાયાદ્વિગુણસુભગાં રઙ્ગભર્તુર્મદાત્મા
    જઙ્ઘાં દૃષ્ટ્વા જનનપદવીજાઙ્ઘિકત્વં જહાતિ ॥ ૩॥

કામારામસ્થિરકદલિકાસ્તમ્ભસમ્ભાવનીયં
    ક્ષૌમાશ્લિષ્ટં કિમપિ કમલાભૂમિનીલોપધાનમ્ ।
ન્યઞ્ચત્કાઞ્ચીકિરણરુચિરં નિર્વિશત્યૂરુયુગ્મં
    લાવણ્યૌઘદ્વયમિવ મતિર્મામિકા રઙ્ગયૂનઃ ॥ ૪॥

સમ્પ્રીણાતિ પ્રતિકલમસૌ માનસં મે સુજાતા
    ગમ્ભીરત્વાત્ક્કચન સમયે ગૂઢનિક્ષિપ્તવિશ્વા ।
નાલીકેન સ્ફુરિતરજસા વેધસો નિર્મિમાણા

રમ્યાવર્તદ્યુતિસહચરી રઙ્ગનાથસ્ય નાભિઃ ॥ ૫॥

શ્રીવત્સેન પ્રથિતવિભવં શ્રીપદન્યાસધન્યં
મધ્યં બાહ્વોર્મણિવરરુચા રઞ્જિતં રઙ્ગધામ્નઃ ।
સાન્દ્રચ્છાયં તરુણતુલસીચિત્રયા વૈજયન્ત્યા
સન્તાપં મે શમયતિ ધિયશ્ચન્દ્રિકોદારહારમ્ ॥ ૬॥

એકં લીલોપહિતમિતરં બાહુમાજાનુલમ્બં પ્રાપ્તા
રઙ્ગે શયિતુરખિલપ્રાર્થનાપારિજાતમ્ ।
દૃપ્તા સેયં દૃઢનિયમિતા રશ્મિભિર્ભૂષણાનાં
ચિન્તાહસ્તિન્યનુભવતિ મે ચિત્રમાલાનયન્ત્રમ્ ॥ ૭॥

સાભિપ્રાયસ્મિતવિકસિતં ચારુબિમ્બાધરોષ્ઠં
દુઃખાપાયપ્રણયિનિ જને દૂરદત્તાભિમુખ્યમ્ ।
કાન્તં વક્ત્રં કનકતિલકાલઙ્કૃતં રઙ્ગભર્તુઃ
સ્વાન્તે ગાઢં વિલગતિ મમ સ્વાગતોદારનેત્રમ્ ॥ ૮॥

માલ્યૈરન્તઃસ્થિરપરિમલૈર્વલ્લભાસ્પર્શમાન્યૈઃ
કુપ્યચ્ચોલીવચનકુટિલૈ કુન્તલૈઃ શ્લિષ્ટમૂલે ।
રત્નાપીડદ્યુતિશબલિતે રઙ્ગભર્તુઃ કિરીટે
રાજન્વત્યઃ સ્થિતિમધિગતા વૃત્તયશ્ચેતસો મે ॥ ૯॥

પાદામ્ભોજં સ્પૃશતિ ભજતે રઙ્ગનાથસ્ય જઙ્ઘા-
મૂરુદ્વન્દ્વે વિલગતિ શનૈરૂર્ધ્વમભ્યેતિ નાભિમ્ ।
વક્ષસ્યાસ્તે વલતિ ભુજયોર્માંમિકેયં મનીષા
વક્ત્રાભિખ્યાં પિબતિ વહતે વાસનાં મૌલિબન્ધે ॥ ૧૦॥

કાન્તોદારરચૈરિહ ભુજૈઃ કઙ્કણજ્યાકિણાઙ્કૈ-
ર્લક્ષ્મીધામ્નઃ પૃથુલપરિઘૈર્લક્ષિતા ભીતિહેતિઃ ।
અગ્રે કિઞ્ચિદ્ભુજગશયનઃ સ્વાત્મનૈવાત્મનઃ સન્
મધ્યેરઙ્ગં મમ ચ હૃદયે વર્તતે સાવરોધઃ ॥ ૧૧॥

રઙ્ગાસ્થાને રસિકમહિતે રઞ્જિતાશેષચિત્તે
વિદ્વત્સેવાવિમલમનસા બેઙ્કટેશેન કૢપ્તમ્ ।
અક્લેશેન પ્રણિહિતધિયામારુરુક્ષોરવસ્થાં
ભક્તિં ગાઢાં દિશતુ ભગવદ્ધ્યાનસોપાનમેતત્ ॥ ૧૨॥

ઇતિ શ્રીમદ્વેઙ્કટેશાર્યપ્રણીતં ભગવદ્ધ્યાનસોપાનં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

---

*bhagavaddhyAnasopAnam*

pdf was typeset on May 28, 2021

Please send corrections to *sanskrit@cheerful.com*